राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८
ISSN - 2231-0452

# उत्कर्षदीपिका
# Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः

सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

# उत्कर्षदीपिका

(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयेन समायोजितं उत्कर्षमहोत्सवमुपलक्ष्य प्रकाश्यमानः महाविन्या: विशेषाङ्कः - २०२३)


ISSN : 2231 - 0452



© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७५०७, आन्ध्रप्रदेशः।



प्रकाशकः : कुलसचिवः

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः - ५१७५०७

आन्ध्रप्रदेशः।

ई-मेल : registrar_nsut@nsktu.org

अन्तर्जालपुटम् : https://nsktu.ac.in

प्रकाशनसमन्वयकः : अनुसन्धान-प्रकाशनविभागः,

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

प्रथमसंस्करणम् : २०२३

मुद्रितप्रतयः : ३१०

पुटसङ्ख्या : ३१८

पुस्तकाकारः : रायल ओक्टाव

मूल्यम् : ₹ 690/-

मुद्रणम् : प्रजाशक्ति प्रिण्टर्स एण्ड पब्लिशर्स प्राइवेट लिमिटेड, तिरुपतिः।

# उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः - २०२३)

## शोधलेखानुक्रमः


| क्र.स. | विषयः | पुटाङ्कः |
|---|---|---|
| १. | भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि<br>– प्रो.रामसलाहीद्विवेदी | 1 |
| २. | कालिदासीयाः केचनापत्यप्रत्ययान्ताः<br>– प्रो.जयकान्तसिंहशर्मा | 5 |
| ३. | सांख्यदर्शने मोक्षस्यावधारणा<br>– प्रो.सुजातात्रिपाठी | 15 |
| ४. | ईश्वरस्वरूपमीमांसा<br>– प्रो.मारकण्डेयनाथतिवारी | 21 |
| ५. | विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्<br>– डॉ. दयाल सिंह पंवार | 34 |
| ६. | न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः<br>– प्रो. बिष्णुपदमहापात्रः | 38 |
| ७. | शिक्षाशास्त्रे नवीनाः विचाराः<br>– आचार्य. के. भरतभूषणः | 46 |
| ८. | वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे<br>– प्रो.प्रभाकरप्रसादः | 52 |
| ९. | वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः<br>– प्रो. प्रेम कुमार शर्मा | 58 |
| १०. | भारतीयजैनज्ञानपरंपरा<br>– प्रो.अनेकांतकुमारजैनः | 67 |

महस्विन्याः विशेषाङ्कः - उत्कर्षदीपिका
विद्वत्समीक्षिता मूल्याङ्किता च शोधपत्रिका (ISSN: 2231-0452), वर्षम् : २०२३

# कालिदासीयाः केचनापत्यप्रत्ययान्ताः

प्रो. जयकान्तसिंहशर्मा *

रससिद्धानां कवीनां वाचि तात्पर्यानुकूलाश्शब्दाः स्वयमहमहमिकया समवेता भवन्ति। तत्र यथायथं कृदन्ततद्धितान्ताख्याताव्ययादयो भाषाप्रवाहे स्वयं प्रवहन्ति। नवनवोन्मेषशालिनी बुद्धिः प्रतिभा, अनुकूलशब्दार्थोपस्थितिः प्रतिभेति प्रतिभावतां काव्यानि दृष्ट्वा प्रतिभालक्षणद्वयमतः कृतमलङ्कारशास्त्रे। अत एव प्रतिभैव काव्यकारणम्, सा स्वाभाविकी आहार्या च, तत्र द्वितीया देवादिप्रसादलभ्या व्युत्पत्त्यभ्यासजन्या चेति द्विविधेत्युक्तम्। काव्यपरिशीलकैर्भावकैःकृदन्ततद्धितान्तादिशब्दप्रयोगसौष्ठवं समालोच्यते। रमणीयार्थप्रतिपादकः शब्दः काव्यमस्तु रसात्मकं वाक्यं वा अन्यदपि किमपि तल्लक्षणं भवतु सर्वत्रानुकूलशब्दार्थोपस्थितिरपेक्ष्यते, अन्यथा काव्यत्वहानिः स्यात्, काव्यत्वे नष्टे कुतस्तत्प्रयोजनावाप्तिः? किञ्च काव्यस्य यन्मुख्यं प्रयोजनद्वयं यच्च तत्काव्यमन्येभ्यश्शास्त्रेभ्यो व्यतिरेचयति, विगलितवेद्यान्तरसम्पर्कशून्यानन्दरूपं कान्तासम्मितोपदेशरूपञ्च यत् तादृशोचितानुकूलतात्पर्यप्रतिपादनासमर्थात्काव्यात् कथमपि न शक्यते लब्धुम्। तथाशब्दार्थोपस्थितिः कविशक्तिं द्योतयति काव्यञ्च तदात्मानन्दसम्पृक्तं साधयति। अत एव शास्त्रे दोषाः गुणाश्च काव्यानां विविच्यन्ते । उदाहरणाय कालिदासस्य श्लोकोऽयं काव्यशास्त्रिभिः समालोचितः "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः[1]" इह या शोचनीयता प्रतिपाद्यास्ति सा पिनाकिशब्दादिभन्ताच्च सिद्ध्यति पिनाकधारिणः शिवस्यारिष्टशमनार्हतया स्पृहणीयत्वात्। 'कपालिनः' इति पदात्तु सिद्ध्यति, अपूतकपालधारिणस्तस्य काकतालीयस्पर्शोऽपि शोच्यतां नयति प्रार्थनालभ्यसमागमस्तु नितराम्। 'कपालिनः' इति पदस्यानुगुणत्वम्। इत्थम्भूतो विचारः काव्यशास्त्रेषु सर्वत्र लभ्यते प्रत्ययव्यङ्ग्यता चोद्घाट्यते। पिनाकिना भग्नमनोरथा सती[2]त्यत्र

---

* व्याकरणाचार्यः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

[1] कुमारसम्भवम् ५.७१

[2] तत्रैव ५.१